अथ

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

प्रारभ्यते ।

अधिकतम सूची मूल्य एक रुपया मात्र.



॥ श्रीगणेशाय नमः ॥ आचम्य प्राणानायम्य । देशकालौ संकीर्त्य च । संकल्पः।अद्य पूर्वोच्चारितैवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममाऽऽत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्वव्याधिनिरासपूर्वकं सर्वाभीष्टसिद्ध्यर्थं श्रीभवानीशङ्कर देवताप्रीत्यर्थं च रुद्रैकादशिन्यभिषेकयुक्तं सकृदावर्तनाभिषेकयुक्तं वा अमुकद्रव्येण रुद्राभिषेकमहं करिष्ये । तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघुषडङ्गन्यासाँश्च करिष्ये ॥ मनोजूतिरितिमन्त्रस्य बृहस्पतिर्ऋषिः। बृहती छन्दः। बृहस्पतिर्देवता । हृदयन्यासे जपे वि

नियोगः ॥ ॐ मनोजूतिर्ज्जुषतामाज्यंस्यबृहस्पतिर्य्यज्ञमिमन्तंनो त्वरिष्टंय्युज्ञꣳसमिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामो ३ म्प्रतिष्ठ ॥ ॐ हृदयाय नमः ॥ १ ॥ अबोध्यग्निरितिमन्त्रस्य बुधग विष्ठिरा ऋषिः । त्रिष्टुप् छन्दः । अग्निर्देवता । शिरोन्यासे जपे विनियो गः ॥ ॐ अबोद्ध्यग्निꣳ समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् । यह्वाऽइवप्रवयामुज्जिहानाꣳप्रभानवꣳसिस्रतेनाकमच्छ ॥ ॐ शिरसे स्वाहा ॥ २ ॥ मूर्द्धानमितिमन्त्रस्य भरद्वाज ऋषिः । त्रिष्टुप् छन्दः । अग्निर्देवता । शिखान्यासे जपे विनियोगः ॥ ॐ मूर्द्धानंदिवोऽअरतिं

म्पृथिव्याव्वैश्वानरमृतऽआजातमग्निम् ॥ कविꣳसुम्राजुमतिंथिञनां
नामासन्नापात्रंजनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥ ३ ॥ मम्मांणित
इतिमन्त्रस्य अप्रतिरथ ऋषिः।विराट् छन्दः। मम्मांणि देवता। कवच
न्यासे जपे विनियोगः ॥ ॐ मम्मांणितेव्वर्म्मणाच्छादयामिसोम
स्त्वाराजामृतेनानुवस्ताम् ॥ उरोव्वरीयोव्वरुणस्तेकृणोतुजयन्तु
न्त्वानुदेवामदन्तु ॥ ॐ कवचायहुम् ॥ ४ ॥ विश्वतश्चक्षुरितिमन्त्र
स्य विश्वकर्मा भौवन ऋषिः। त्रिष्टुप् छन्दः।विश्वकर्मा देवता। नेत्रन्या
से जपे विनियोगः ॥ ॐ व्विश्वतश्चक्षुरुतव्विश्वतोमुखोव्विश्वतोबाहुरु

ताम्बिश्वर्तस्पात् ॥ सम्बाहुभ्यान्धमंतिसम्पतंत्रैर्द्यावाभूमीजनयंन्देव
ऽएकः॥ ॐ नेत्रत्रयाय वौषट् ॥ ५ ॥ मानस्तोक इतिमन्त्रस्य परमेष्ठी
ऋषिः । जगती छन्दः । एकरुद्रो देवता । अस्त्रन्यासे जपे विनियोगः
॥ ॐ मानंस्तोकेतनंयेमानऽआयुंषिमानोगोषुमानोऽअश्वेंषुरीरिषः॥
मानोंवीरान्रुंद्रभामिनोंवधीर्हविष्मंन्तुंत्सदमित्त्वांहवामहे ॥ ॐ अस्त्रा
य फट् ॥ ६ ॥ ॥ इति लघुषडङ्गन्यासाः ॥ ॥ ७ ॥

॥ श्रीगणेशायनमः ॥ ॥ हरिः ॐ ॥ माच्छन्दः प्रमाच्छन्दः प्रतिमा
च्छन्दोऽअस्रीवयुश्छन्दः पङ्क्तिश्छन्दऽउष्णिक्छन्दोबृहतीच्छन्दोनुष्टु
पछन्दोविराट्छन्दोगायत्रीच्छन्दास्त्रिष्टुपछन्दोजगतीच्छन्दः ॥ १ ॥
पृथिवीच्छन्दोन्तरिक्षञ्छन्दोद्यौश्छन्दःसमाश्छन्दोनक्षत्राणिच्छ
न्दोवाक्छन्दोमनुश्छन्दः कृषिश्छन्दोहिरण्यञ्छन्दोगौश्छन्दोजाच्छ
न्दोश्वश्छन्दः ॥ २ ॥ गुणानान्त्वागुणपतिꣳहवामहेप्रियाणान्त्वा
प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥ आह
मजानिगर्भ्मधमात्वमजासिगर्भ्मधम् ॥ ३ ॥ गायत्रीत्रिष्टुभजगत्यनुष्टु

प्पङ्क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शम्म्यन्तु त्वा ॥ ४ ॥ द्वि
पदायाश्चतुष्पदास्त्रिपदायाश्च षट्पदाः ॥ विच्छन्दायाश्च सच्छन्दाः
सूचीभिः शम्म्यन्तु त्वा ॥ ५ ॥ सहस्तोमाः सहच्छन्दस ऽआवृतः सह
प्प्रमा ऽऋषयः सप्तदैव्याः ॥ पूर्वेषाम्पन्थामनुदृश्य धीरा ऽअन्वालेभि
रेरत्थ्यो नरश्मीन् ॥ ६ ॥ यज्जाग्ग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवै
ति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ७ ॥
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ॥ यदपूर्व्वँ यक्ष
मन्तः प्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ८ ॥ यत्प्रज्ञानमुत

चेतोधृतिश्चयज्ज्योतिरुन्तरमृतम्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्चनक
म्मक्रियतेतन्म्मेमनः शिवसङ्कल्प्पमस्तु ॥ ९ ॥ येनेदम्भूतम्भुवनम्भ
विष्य्यत्परिगृहीतमुमृतेनसर्व्वम् ॥ येनयज्ञस्तायतेसुप्तहोतातन्म्मेम
नः शिवसङ्कल्प्पमस्तु ॥ १० ॥ यस्म्मिन्नृचःसामुयजूंषियस्म्मिन्प्र
तिष्ठितारथनाभाविवाराः ॥ यस्म्मिँश्चित्तर्ठसर्व्वमोतम्प्रजानान्तन्मे
मनः शिवसङ्कल्प्पमस्तु ॥ ११ ॥ सुषारथिरश्वाँनिवयन्म्मनुष्य्यान्नेनी
यतेभीशुंभिर्व्वाजिनऽइव॥ हृत्प्रतिष्ठुंय्यदजिरञ्जविष्ठन्तन्म्मेमनः शिवस
ङ्कल्प्पमस्तु॥१२॥ इतिसर्ठहितायांरुद्रपाठेप्रथमोऽध्यायः॥१॥ ॥ओ॥

सुहस्रंशीर्षापुरुंषःसहस्राक्षःसुहस्रंपात् ॥ सभूमिंꣳसुर्व्वतःस्पृत्वात्यंति
ष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुंषऽएवेदꣳसर्व्वँय्यद्भूतँय्यच्चंभाव्यम् ॥ उता
मृतत्वस्येशांनोयदन्नेनातिरोहंति ॥ २ ॥ एतावांनस्यमहिमातोज्या
यांँश्चपूरुंषः ॥ पादोंस्यविश्श्वाभूतानित्रिपादंस्यामृतंन्दिवि ॥ ३ ॥
त्रिपादूर्द्ध्वऽउदैत्पुरुंषःपादोंस्येहाभंवत्पुनंः ॥ ततोविष्ष्वङ्व्यक्राम
त्साशनानशनेऽअभि ॥ ४ ॥ ततोंविराडंजायतविराजोऽअधिपूरुंषः ॥
सजातोऽअत्यंरिच्यतपश्चाद्भूमिमथोंपुरः ॥ ५ ॥ तस्म्मांद्यज्ञात्सर्व्व
हुतःसम्भृतम्पृषदाज्यम् ॥ पशूँस्ताँश्चंक्रेवायव्यानारण्याग्ग्राम्म्या

श्चये ॥ ६॥ तस्मा॑द्य॒ज्ञात्स॑र्व्व॒हुत॒ऽऋच॒ः सामा॑निजज्ञिरे ॥ छन्दा॑ꣳसि
जज्ञिरे॒तस्म्मा॒द्यजु॒स्तस्म्मा॑दजायत ॥ ७ ॥ तस्म्मा॒दश्श्वा॑ऽअजाय
न्त॒येकेचो॑भ॒याद॑तः ॥ गावो॑हजज्ञिरे॒तस्म्मा॒त्तस्म्मा॑ज्जा॒ताऽअ॑जा॒व
य॑ः ॥ ८ ॥ तँय्य॒ज्ञम्ब॒र्हिषि॒प्प्रौक्ष॒न्पुरु॑षञ्जा॒तम॑ग्ग्र॒तः ॥ तेन॑दे॒वाऽअ॑
यजन्तसा॒ध्याऽऋष॑यश्च्च॒ये ॥ ९ ॥ यत्पुरु॑षँव्व्यद॑धुः॒कति॒धाव्व्य॑कल्पय
न् ॥ मुख॒ङ्किमस्यासी॒त्किम्बा॒हूकिमू॒रूपादा॑ऽउच्च्येते ॥ १० ॥ ब्रा॒ह्म॒
णो॒स्य॒मुख॑मासीद्बाहूरा॑ज॒न्न्य॒ः कृ॒तः ॥ ऊ॒रूतद॑स्य॒यद्वैश्य॑ः प॒द्भ्याꣳशु॒
द्रोऽअ॑जायत ॥११॥ च॒न्द्रमा॒मन॑सोजा॒तश्च्चक्षो॒ः सूर्य्यो॑ऽअजायत ॥

श्रोत्रा॑द्वा॒युश्च॑प्रा॒णश्च॒मुखा॑द॒ग्निर॑जायत ॥ १२ ॥ नाभ्या॑ऽआसी
द॒न्तरि॑क्षꣳशी॒र्ष्णोद्यौः सम॑वर्त्तत ॥ प॒द्भ्याम्भूमि॒र्द्दिश॒ः श्रोत्रा॒त्तथा॑लो
काँ २॥ऽअ॑कल्पयन् ॥ १३ ॥ यत्पुरु॑षेणह॒विषा॑दे॒वाय॒ज्ञम॑तन्वत ॥
व॒स॒न्तो॒स्यासी॒दाज्ज्य॑ङ्ग्री॒ष्म्मऽइ॒ध्म्मः श॒रद्ध॒विः ॥ १४ ॥ स॒प्ता
स्या॑सन्परि॒धय॒स्त्रिः स॒प्तस॒मिध॑ः कृ॒ताः ॥ दे॒वायद्य॒ज्ञन्त॑न्वा॒नाऽअब॑
ध्न॒न्पुरु॑षम्प॒शुम् ॥ १५ ॥ य॒ज्ञेन॑य॒ज्ञम॑यजन्तदे॒वास्तानि॒धर्म्मा॑णि
प्प्रथ॒मान्न्या॑सन् ॥ तेह॒नाक॑म्महि॒मान॑ः सचन्त॒यत्र॒पूर्व्वे॑सा॒ध्ध्याः सन्ति
देवाः ॥ १६ ॥ अ॒द्भ्यः सम्भृ॑तः पृथि॒व्यैरसा॑च्चवि॒श्वक॑र्म्मण॒ः सम॑वर्त्त॒ता

ग्ग्रे ॥ तस्यत्वष्टाविदधद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥
वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसःपरस्तात् ॥ तमेवविदि
त्वातिमृत्युमेतिनान्यःपन्थाविद्यतेयनाय ॥ १८ ॥ प्प्रजापतिश्चरति
गर्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्ययोनिम्परिपश्यन्तिधी
रास्तस्मिन्हतस्त्थुर्भुवनानिविश्वा ॥ १९ ॥ योदेवेभ्यऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेभ्योजातोनमोरुचायब्राह्मये ॥ २० ॥
रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्च्चतेलक्ष्म्मीश्च्चपत्न्न्यावहोरात्रे

पा॒र्श्वेनक्ष॑त्राणिरू॒पम॒श्विनौ॒ऽव्यात्त॑म् ॥ इ॒ष्णन्नि॑षाणा॒मुम्म॑ऽइषाणस
र्व्वलो॒कम्म॑ऽइषाण ॥ २२ ॥ ॥ इतिसꣳहितायांरुद्रपाठेद्वितीयोऽध्या
यः ॥ २ ॥ ॥छ॥ आ॒शुः॒शिशा॑नोवृष॒भोनभी॒मोघ॑नाघ॒नः॒क्षोभ॑णश्चर्ष
णी॒नाम् ॥ स॒ङ्क्रन्द॑नोनिमि॒षऽए॑कवी॒रः॒श॒तꣳसेना॑ऽअजयत्सा॒कमि
न्द्रः॑ ॥ १ ॥ स॒ङ्क्रद॑नेनानिमि॒षेण॑जि॒ष्णुना॑यु॒त्का॒रेण॑दुश्च्यव॒नेन॑धृ॒ष्णु
ना॑ ॥ तदिन्द्रे॑णजयत॒तत्स॑हद्ध्वँ॒य्युधो॑नर॒ऽइषु॑हस्तेन॒वृष्णा॑ ॥ २ ॥ सऽ
इषु॑हस्तैः॒सनि॑ष॒ङ्गिभि॑र्व्व॒शीसꣳस्र॑ष्टा॒सयुध॒ऽइन्द्रो॑ग॒णेन॑ ॥ स॒ꣳसृ॒ष्ट॒जि
त्सो॑म॒पाबा॑हुश॒द्ध्यु॒ग्ग्रध॑न्वा॒प्रति॑हिताभि॒रस्ता॑ ॥ ३ ॥ बृह॑स्प्पते॒परि॑दी

यारथैनरक्षोहामित्राँ२॥ऽअपबाधमानः ॥ प्रभुञन्त्सेनाःप्रमृणोयु
धाजयन्नस्माकमेद्धचवितारथानाम् ॥ ४ ॥ बलविज्ञायस्थविरःप्रवी
रःसहस्वान्वाजीसहमानऽउग्रः ॥ अभिवीरोऽअभिसत्वासहोजाजैत्र
मिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिदंगोविदंवज्रबाहुञयन्तमज्म
प्रमृणन्तमोजसा ॥ इमर्ठ्सजातऽअनुवीरयध्वमिन्द्रर्ठ्सखायोऽअनु
सर्ठ्रभद्धम् ॥ ६ ॥ अभिगोत्राणिसहसागाहमानोदयोवीरःशुतम
न्न्युरिन्द्रः ॥ दुश्च्यवनःपृतनाषाडयुद्ध्योस्म्माकर्ठ्सेनाऽअवतुप्रयु
त्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपुरऽएतुसोमः ॥

दे॒व॒से॒नाना॑मभिभञ्जती॒नाञ्जय॑न्तीनाम्म॒रुतो॑य॒न्त्वग्ग्र॑म् ॥ ८ ॥ इन्द्र॑
स्य॒वृष्ष्णो॒वरु॑णस्य॒राज्ञ॑ऽआदि॒त्याना॑म्म॒रुता॒ᳪंशर्द्धऽउ॒ग्ग्रम् ॥ म॒हा
म॑नसाम्भुवनच्च्यवाना॒ङ्घोषो॑दे॒वाना॒ञ्जय॑ता॒मुद॑स्त्थात् ॥ ९ ॥ उद्ध॑
र्षयमघव॒न्नायु॑धा॒न्यत्सत्त्व॑नाम्मामु॒काना॒म्मना॑ᳪंसि ॥ उद्द्वृत्रहन्न्वा
जिना॒ँव्वाजि॑ना॒न्युद्रथा॑ना॒ञ्जय॑ताँय्यन्तु॒घोषाः॑ ॥ १० ॥ अ॒स्म्माक॒मि
न्द्रः॒समृ॑तेषु॒द्ध्व॒जेष्ष्व॒स्म्माकँ॒य्याऽइष॑व॒स्ताज॑यन्तु ॥ अ॒स्म्माकँव्वी
राऽउत्त॑रेभवन्त्व॒स्म्माँ२॥ऽउ॑देवाऽअवता॒हवे॑षु ॥ ११ ॥ अ॒मीषा॑ञ्चि॒
त्तम्प्र॑तिलो॒भय॑न्तीगृहा॒णाङ्गा॑न्यप्प्वे॒परे॑हि ॥ अ॒भिप्प्रेहि॒निद्दर्ह॑हृ॒त्स॒

शोकैरन्धेनामित्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टापरापतशर
व्येब्रह्मसꣳशिते ॥ गच्छामित्रान्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः
॥ १३ ॥ प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु ॥ उग्रावःसन्तुबाहवो
नाधृष्ष्यायथासथ ॥ १४ ॥ असौय्यासेनामरुतःपरेषामभ्यैतिनऽ
ओजसास्प्पर्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअन्न्योऽअन्न्य
न्नजानन् ॥ १५ ॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव ॥ तन्नऽ
इन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुविश्श्वाहाशर्म्मयच्छतु ॥ १६ ॥
मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उ

रोर्व्वरींयोव्वरुंणस्तेकृणोतुजयंन्तुन्त्वानुंदेवामंदन्तु ॥ १७ ॥ ॥ इति सठ्ठहितायांरुद्रजाप्येतृतीयोऽध्यायः ॥ ३ ॥ ॥ ७ ॥ व्विम्भ्राड्बृह त्पिबतुसोम्म्यम्मद्धायुर्दधद्यज्ञपंतावविंहुतम् ॥ व्वातंजूतोयोऽअंभिर क्षंतित्क्मनांप्रजाःपुपोषपुरुधाव्विरांजति ॥ १ ॥ उदुत्यञ्जातवेंदसन्दे वँव्वंहन्तिकेतवंः ॥ दृशेव्विश्व्वांयसूर्य्यम् ॥ २ ॥ येनांपावकुचक्षंसाभु रुण्यन्तुञनाँ२॥ऽअनुं ॥ त्वँव्वंरुणपश्यंसि ॥ ३ ॥ दैव्यांवद्धूर्य्यूऽआग तुर्ठ्रथेंनुसूर्य्यत्वचा ॥ मद्धांयुज्ञर्ठ्संमंआथे ॥ तम्प्रुत्क्रथायँव्वंनश्चि त्रन्देवानांम् ॥ ४ ॥ तम्प्रुत्क्रथांपूर्व्वथांव्विश्व्वथेमथांज्येष्ठतांतिम्बर्हि

षदꣳस्वार्व्विदम् ॥ प्रतीचीनँवृजनन्दोहसेधुनिमाशुꣳजयन्तमनुयासुवꣳसे ॥ ५ ॥ अयँवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने ॥ इममपाꣳसङ्गमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति ॥ ६ ॥ चित्रन्देवानामुदगादनीकꣳचक्षुर्म्मित्रस्यवरुणस्याग्नेः ॥ आप्राद्यावापृथिवीऽअन्तरिक्षꣳसूर्य्यऽआत्माजगतस्तस्थुषश्च ॥ ७ ॥ आनोऽइडाभिर्व्विदथेसुशस्तिविश्वानरस्सवितादेवऽएतु ॥ अपियथायुवानोमत्सथानोविश्वꣳअगदमिपित्वेमनीषा ॥ ८ ॥ यदुद्यन्त्सवृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तादिन्द्रतेवशे ॥ ९ ॥ तुरणिर्व्विश्वदर्शतोज्योतिष्कृदसि

सूर्य्य ॥ विश्वमाभासिरोचनम् ॥ १० ॥ तत्सूर्य्यस्यदेवत्वन्तन्महि
त्वम्मद्ध्याकर्त्तोर्व्वितंतर्ठ्ठसञ्जभार ॥ यदेदयुक्तहरितः सधस्थादाद्रात्री
वासस्तनुतेसिमस्म्मै ॥ ११ ॥ तन्मित्रस्यवरुणस्याभिचक्षेसूर्य्योरू
पङ्कृणुतेद्योरुपस्थे ॥ अनन्तमन्न्यद्रुशदस्यपाजः कृष्णमन्न्यद्धरितः स
म्भरन्ति ॥ १२ ॥ बण्ण्महाँ २॥ऽअसिसूर्य्यबडादित्यमहाँ २॥ऽअसि ॥
महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ २॥ऽअसि ॥ १३ ॥ बट्सू
र्य्यश्श्रवसामहाँ २॥ऽअसिसत्रादेवमहाँ २॥ऽअसि ॥ मह्नादेवानामसु
र्य्यः पुरोहितोविभुज्ज्योतिरदाब्भ्यम् ॥ १४ ॥ श्रायन्तऽइवसूर्य्यँवि

श्वेदिन्द्रंस्यभक्षत ॥ व्वसूंनिजातेजनंमानुऽओजंसाप्प्रतिंभागन्नदी
धिम ॥ १५ ॥ अद्यादेवाऽउदितासूर्य्यस्यनिरꣳहसःपिपृतानिरंव
द्यात् ॥ तन्नोमित्रोव्वरुणोमामहन्तामदितिःसिन्धुःपृथिवीऽउतद्यौः
॥१६॥ आकृष्णेनरजंसाव्वर्त्तमानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥ हिरण्ययें
नसवितारथेनादेवोयांतिभुवंनानिपश्यंन् ॥ १७ ॥ ॥ इति सꣳहि
तायांरुद्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ छ ॥ ॐ नमंस्तेरुद्रम
न्यवंऽउतोतऽइषंवेनमंः ॥ बाहुब्भ्यांमुततेनमंः ॥ १ ॥ यातेंरुद्रशि
वातनूरघोरापांपकाशिनी ॥ तयांनस्त्वन्न्वाशन्तंमयागिरिंशन्ताभि

चाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तुहस्तेबिभर्ष्यस्तवे ॥ शिवाङ्गिरि
त्रताङ्कुरुमाहिꣳसीःपुरुषञ्जगत् ॥ ३ ॥ शिवेनवचसात्वागिरिशाच्छा
वदामसि ॥ यथानःसर्व्वमिज्जगदयक्ष्मꣳसुमनाऽअसत् ॥४॥ अद्ध्यवो
चदधिवक्ताप्प्रथमोदैव्योभिषक् ॥ अहींश्चसर्व्वाञ्जम्भयन्त्सर्व्वाश्चयातु
धान्योधराचीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुम-
ङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्श्रिताःसहस्रशोवैषाꣳहेडऽईमहे
॥६॥ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्श्रन्न
दृश्श्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ ७ ॥ नमोस्तुनीलग्ग्रीवायस

हस्त्राक्षायमीढुषे ॥ अथोषेऽअस्युसत्त्वांनोहन्तेभ्योकरन्नमः ॥ ८ ॥
प्रमुञ्चुधन्वंनुस्त्वमुभयोरार्त्न्योर्ज्याम् ॥ याश्चतेहस्तेऽइषवःपराता
भगवोवप ॥ ९ ॥ विज्यन्धनुःकपर्दिनोविशल्योबाणवाँ २ ॥ ऽउत ।
अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिर्म्मीढुष्ट
मुहस्तेबभूवंतेधनुः ॥ तयास्मान्विश्वतस्त्वमयक्ष्मयापरिभुज ॥
॥ ११ ॥ परिंतेधन्वंनोहेतिरस्मान्वृणक्तुविश्वतः ॥ अथोयऽइषु
धिस्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्त्यधनुष्ट्वंसहस्त्राक्षशत
वुधे ॥ निशीर्य्यशल्यानाम्मुखाँशिवोनःसुमनाभव ॥ १३ ॥ नमस्तुऽ

आयुंधायानांततायधृष्णवै ॥ उभाभ्यांमुततेनमौबाहुभ्यान्तवुध
न्वने ॥ १४ ॥ मानौमुहान्तंमुतमानौऽअर्भकम्मानुऽउक्षन्तमुतमान
ऽउक्षितम् ॥ मानौव्वधीःपितरुम्मोतमातरुम्मानःप्प्रियास्तन्वोरुद्ररी
रिषः ॥ १५ ॥ मानस्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्वे
षुरीरिषः ॥ मानौव्वीरान्त्रुद्रभामिनोव्वधीर्हविष्मन्तःसदमित्त्वांहवा
महे ॥१६॥ नमोहिरण्यबाहवेसेनान्येदिशाञ्चपतयेनमोनमोव्वृक्षेभ्यो
हरिकेशेभ्यःपशूनाम्पतयेनमोनमःशष्पिञ्जरायत्विषीमतेपथीना
म्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पतयेनमोनमोबभ्लुशा

यं ॥ १७ ॥ नमोबब्म्लुशायव्याधिनेन्नांनुाम्पतंयेनमुोनमौभुवस्यंहु
त्यैजगंतुाम्पतंयेनमुोनमौरुद्रायातंतुायिनेक्षेत्रांणुाम्पतंयेनंमुोनमं÷सू
तायाहंन्त्यैव्वनांनुाम्पतंयेनमुोनमुोरोहिंताय ॥ १८ ॥ नमुोरोहिंताय
स्त्थुपतंयेव्वृक्षाणुाम्पतंयेनमुोनमौभुवुन्तयैव्वारिवस्कृतायौषधीनुाम्प-
तंयेनमुोनमौमुन्त्रिणेंव्वाणिजायुकक्षांणुाम्पतंयेनमुोनमंऽउच्चैग्घौंषा
याक्रुन्दयंतेपत्तीनाम्पतंयेनमुोनमं÷कृत्स्नाय ॥ १९ ॥ नमं÷कृत्स्नायुत
युाधावंतेसत्त्वांनुाम्पतंयेनमुोनमुत्सहंमानायनिव्याधिनंऽआव्याधि
नींनुाम्पतंयेनमुोनमौंनिषुङ्गिणेंककुभायंस्तेनानुाम्पतंयेनमुोनमौंनि

चेरवेपरिचरायारण्यानाम्पतयेनमोनमोव्रज्यते ॥ २० ॥ नमोव्रज्यते
परिवज्यतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणेऽइषुधिमतेतस्कराणाम्प
तयेनमोनमः स्तृकायिभ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमो
सिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ २१ ॥ नमऽउष्णीषि
णेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवो
नमोनमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्चवोनमोनमऽआयच्छ
द्भ्योस्यद्भ्यश्चवोनमोनमोविसृजद्भ्यः ॥ २२ ॥ नमोविसृजद्भ्योवि
द्धयद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्रद्भ्यश्चवोनमोनमःशयानेभ्यु

ऽआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमोनमः सुभा
भ्यः ॥ २३ ॥ नमः सुभाभ्यः सुभापतिभ्यश्चवोनमोश्वेभ्यो
श्वपतिभ्यश्चवोनमोनमऽआव्याधिनीभ्योविविद्ध्यन्तीभ्यश्चवोन
मोनमऽउगणाभ्यस्तृंहतीभ्यश्चवोनमोगुणेभ्यः ॥ २४ ॥ नमो
गुणेभ्योगुणपतिभ्यश्चवोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो
नमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोविरूपेभ्योविश्वरूपे
भ्यश्चवोनमोनमुत्सेनाभ्यः ॥ २५ ॥ नमुत्सेनाभ्यउत्सेनानिभ्यश्च
वोनमोनमोरथिभ्योऽअरथेभ्यश्चवोनमोनमः क्षुत्तृभ्यः सङ्गृहीत्र

व्भ्यंश्चवोनमोनमोमुहद्भ्योऽअर्भुकेभ्यंश्चवोनमः ॥ २६ ॥ नमस्तक्षभ्योरथकारेभ्यंश्चवोनमोनमःकुलालेभ्यःकुर्म्मारेभ्यश्चवोनमो नमोनिषादेभ्यंःपुञ्जिष्टेभ्यश्चवोनमोनमःश्वनिभ्योमृगयुभ्यंश्च वोनमोनमःश्वभ्यंः ॥ २७ ॥ नमःश्वभ्युःश्वपतिभ्यश्चवोनमोन मोभुवायंचरुद्रायंचुनमःशुर्व्वायंचपशुपतयेचुनमोनीलंग्रीवायचशि तिकण्ठायचुनमःकपर्द्दिनें ॥ २८ ॥ नमःकपर्द्दिनेचव्युप्तकेशायचु नमःसहस्त्राक्षायंचशुतधन्वनेचु ॥ नमोगिरिशुयायंचशिपिविष्टायं चुनमोमीढुष्टमायुचेषुमतेचुनमोह्रस्वायं ॥ २९ ॥ नमोह्रस्वायंचवा

मुनायंचुनमौबृहतेचुवषीयसेचुनमौवृद्धायचसुवृधेचुनमोग्र्यायचप्र
थुमायंचुनमंऽआशवे ॥ ३०॥ नमंऽआशवेचाजिरायंचुनमुत्शीघ्र्यांय
चुशीभ्यांयचुनमुऽऊम्र्यांयचावस्वन्यायचुनमौनादेयायंचुद्वीप्यां
यच ॥ ३१ ॥ नमौज्येष्ठायंचकनिष्ठायंचुनमंःपूर्वजायंचापरजायंचु
नमौमध्युमायंचापगुल्भायंचुनमौजघन्यायचबुद्ध्न्यायचुनमुत्सो
ब्म्यांय ॥ ३२ ॥ नमुत्सोब्म्यांयचप्रतिसुर्य्यायचुनमोयाम्यांय
चुक्षेम्यांयचुनमुश्श्लोक्यांयचावसान्यायचुनमंऽउर्व्वुर्य्यायचुख
ल्यांयचुनमोवन्यांय ॥ ३३ ॥ नमोवन्यांयचुकक्ष्यांयचुनमंः

यंचप्रतिश्रुवायंचनमऽआशुषेणायचाशुरथायचनमुःशूरायचावभे
दिनेचनमौबिल्म्मनै ॥ ३४ ॥ नमौबिल्म्मनैचकवचिनेचनमौ
ब्वर्म्मिणेचब्वरूथिनेचनमःश्रुतायंचश्रुतसेनायंचनमोदुन्दुब्भ्यायचा
हनन्त्यायचनमोधृष्णवै ॥ ३५ ॥ नमोधृष्णवेचप्रमृशायंचनमौ
निषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायंचसु
धन्वनेच ॥ ३६ ॥ नमुःस्रुत्यायचपथ्यायचनमुःकाट्यायचनी
प्यायचनमुःकुल्ल्यायचसरस्यायचनमौनादेयायचवैशन्तायंचनमुः
कूप्यायं ॥ ३७ ॥ नमुःकूप्यायचावट्यायचनमोवीद्ध्यायचातप्या

यचुनमोमेग्व्यायचविद्युत्यायचुनमोवर्ष्यायचावृष्यायंचुनमोवा
त्यायं॥३८॥नमोवात्यायंचरेष्म्यायंचुनमौवास्तव्यायचवास्तुपाय
चुनमःसोमायंचरुद्रायंचुनमंस्तुाम्रायंचारुणायंचुनमःशुङ्गवे ॥ ३९ ॥
नमःशुङ्गवेचपशुपतयेचुनमऽउग्रायंचभीमायंचुनमोग्रेवधायंचदूरे
वधायंचुनमोहन्त्रेचहनीयसेचुनमोवृक्षेभ्योहरिकेशेभ्योनमंस्तारा
यं ॥ ४० ॥ नमःशम्भवायंचमयोभवायंचुनमःशङ्कायंचमयस्करा
यंचुनमःशिवायंचशिवतरायच ॥ ४१ ॥ नमुःपार्यायचावार्यायचु
नमःप्रतरणायचोत्तरणायचुनमुस्तीर्थ्यायचुकुल्यायंचुनमुःश

ष्प्प्यायचुफेन्न्यायचुनमः सिकुत्त्याय ॥४२॥ नमः सिकुत्त्यायचप्प्रवा
ह्य्यायचुनमः किꣳशिलायचक्षयुणायचुनमः कपर्द्दिनेचपुलस्तयेचुन
मऽइरिण्यायचप्प्रपत्त्थ्यायचुनमोव्व्रज्ज्याय ॥४३॥ नमोव्व्रज्ज्यायचुगो
ष्ठ्यायचुनमस्तल्प्प्यायचुगेह्य्यायचुनमोहृदय्यायचनिवेष्ष्यायचु
नमः काट्ट्यायचगह्वरेष्ठायचुनमः शुष्क्क्याय ॥४४॥ नमः शुष्क्क्यायच
हरित्यायचुनमः पाꣳसव्व्यायचरजस्यायचुनमोलोप्प्यायचोल्लप्प्या
यचुनमऽऊर्व्व्यायचुसूर्व्व्यायचुनमः पर्ण्णाय ॥ ४५ ॥ नमः पर्ण्णायचप
र्ण्णशदायचुनमऽउदद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्प्रखिद

तेचुनमंऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳ
हृदयेभ्योनमोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमंऽआनिर्हते
भ्यः ॥४६॥ द्रापेऽअन्धसस्पतेदरिद्रन्नीललोहित ॥ आसाम्प्रजानामे
षाम्पशूनाम्माभेर्म्मारोङ्मोचंनुःकिञ्चनामंमत् ॥ ४७ ॥ इमारुद्रायंतवसे
कपर्द्दिनेक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्द्विपदेचतुष्पदेवि
श्वंम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥ ४८ ॥ यातेरुद्रशिवातनूःशिवा
विश्वाहाभेषजीशिवारुतस्यभेषजीतयानोमृडजीवसे ॥ ४९ ॥ परि
नोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघ

वंद्भ्यस्तनुष्वमीढ्वंस्तोकायतनंयायमृड ॥ ५० ॥ मीढुंष्टमशिवंतम
शिवोनंः सुमनांभव ॥ परमेवृक्षऽआयुंधन्निधायकृतिँवसांनऽआचंरपि
नांकम्बिभ्रदागंहि ॥ ५१ ॥ विकिंरिद्रविलोंहितनमंस्तेऽअस्तुभगवः ॥
यास्तेंसहस्रंꣳहेतयोन्यमस्मन्निवंपन्तुताः ॥ ५२ ॥ सहस्रांणिसहस्र
शोबाह्वोस्तवंहेतयंः ॥ तासामीशांनोभगवःपराचीनामुखांकृधि ॥ ५३ ॥
असंङ्ख्यातासहस्रांणियेरुद्राऽअधिभूम्म्यांम् ॥ तेषांꣳसहस्रयोजनेव
धन्वांनितन्मसि ॥ ५४ ॥ अंस्मिन्महत्यर्णवेन्तरिंक्षेभवाऽअधिं ॥
तेषांꣳसह० ॥ ५५ ॥ नीलंग्ग्रीवाःशितिकण्ठादिवंꣳरुद्राऽउपंश्श्रिताः ॥

तेषां० ॥ ५६ ॥ नीलग्रीवाःशितिकण्ठाःशुर्वाऽअधःक्षमाचराः ॥ तेषा० ॥ ५७ ॥ येवृक्षेषुशुष्पिञ्जरानीलग्रीवाविलोहिताः ॥ तेषां० ॥ ५८ ॥ येभूतानामधिपतयोविशिखासःकपर्दिनः ॥ तेषां० ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलवृदाऽआयुर्युधः ॥ तेषां० ॥ ६० ॥ येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषां० ॥ ६१ ॥ येन्नेषुविविध्यन्तिपात्रेषुपिबतोजनान् ॥ तेषां० ॥ ६२ ॥ षऽएतावन्तश्चभूयांश्चसश्चदिशोरुद्राविंतस्थिरे ॥ तेषां० ॥ ६३ ॥ नमोस्तुरुद्रेभ्योयेदिविषेषाँवर्षमिषवः ॥ तेभ्योदशप्राचीर्दशदक्षिणादशप्रतीचीर्दशोदीची

र्द्दशो॒र्द्ध्वाः ॥ तेब्भ्यो॒नमो॑ऽअस्तु॒तेनो॑वन्तु॒तेनो॑मृडयन्तु॒तेयद्वि॒ष्म्मोय
श्च॑नो॒द्वेष्टि॒तमे॑षा॒ञ्जम्भे॑दध्ध्मः ॥ ६४ ॥ नमो॑स्तुरु॒द्रेब्भ्यो॒ये॒न्तरि॑क्षे॒येषाँ
व्वात॒ऽइष॑वः ॥ तेब्भ्यो॒दश॒प्प्राची॒र्द्दश॑दक्षि॒णादश॑प्प्र॒तीची॒र्द्दशोदी॑ची॒
र्द्दशो॒र्द्ध्वाः ॥ तेब्भ्यो॒नमो॑ऽअस्तु॒तेनो॑वन्तु॒तेनो॑मृडयन्तु॒तेयन्द्वि॒ष्म्म्मो
यश्च॑नो॒द्वेष्टि॒तमे॑षा॒ञ्जम्भे॑दध्ध्मः ॥ ६५ ॥ नमो॑स्तुरु॒द्रेब्भ्यो॒येपृथि॒व्याँ
य्येषा॒मन्न॒मिष॑वः ॥ तेब्भ्यो॒दश॒प्प्राची॒र्द्दश॑दक्षि॒णाद॑शप्प्र॒तीची॒र्द्दशो॒
दी॑ची॒र्द्दशो॒र्द्ध्वाः ॥ तेब्भ्यो॒नमो॑ऽअस्तु॒तेनो॑व्वन्तु॒तेनो॑मृडयन्तु॒तेयन्द्वि
ष्म्मोयश्च॑नो॒द्वेष्टि॒तमेषा॒ञ्जम्भदध्ध्मः ॥ ६६ ॥ इतिसꣳहितायांरुद्र

पाठेपञ्चमोऽध्यायः ॥५॥ ॥ध॥ ॥ पुनर्नमस्ते इत्यादिषोडश काण्डिकाः पठनीयाः॥१६॥एषतेरुद्रभागःसुहस्वस्त्राम्बिकयातञ्जुषस्वुस्वाहैषतेरुद्रभागऽआषुस्तैपशुः ॥१॥ अवरुद्रमदीमुल्यवंदेवन्त्र्यम्बकम्॥यथानोवस्यसुस्करद्यथानुःश्रेयसुस्करद्यथानोव्यवसाययात्॥२॥ नमस्तेरुद्रमन्यवऽउतोतऽइषवेनमः॥बाहुब्भ्यांमुततेनमः ॥३॥ यातेरुद्र शिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि।४।नतम्विदाथुयऽइमाजुजानान्यद्युष्माकुमन्तरम्बभूव। नीहारेणप्रावृतुाजल्प्याचासुतृपऽउक्थुशासश्चरन्ति।५। विश्वकर्म्मा

ह्यजं॑निष्ट दे॒वऽआदिद्ग॑न्ध॒र्व्वोऽअ॑भवद्वि॒तीय॑ः ॥ तृ॒तीय॑ः पि॒ताज॑नि॒तौष॑
धीनाम॒पाङ्गर्ब्भँ॒व्य॒दधात्पुरु॒त्रा ॥ ६ ॥ मीढु॑ष्टम॒शिव॑तमशि॒वोन॑ः सु॒म
नाभव ॥ प॒र॒मेव्वृ॒क्षऽआयु॑धन्नि॒धाय॒कृत्ति॒ँव्वसा॑न॒ऽआच॑र॒पिना॑क॒म्बिब्भ्र॒
दाग॑हि ॥७॥ व्विकि॑रिद्र॒व्विलो॑हित॒नम॑स्तेऽअस्तुभगवः ॥ यास्ते॑स॒हस्र॑
ꣳहे॒तयो॒न्यम॒स्म्मन्निव॑पन्तु॒ताः ॥ ८ ॥ स॒हस्रा॑णिसहस्र॒शोबा॒ह्वोस्तव॑
हे॒तय॑ः ॥ तासा॒मीशा॑नोभगवः॒परा॒चीना॒मुखा॑कृधि ॥ ९ ॥ अस॑
ङ्ख्यातास॒हस्रा॑णि॒येरु॒द्राऽअधि॒भूम्या॑म् ॥ तेषा॑ꣳसहस्रयोज॒नेव॒ध
न्वा॑नितन्मसि ॥ १० ॥ व्व॒यꣳसो॑मव्व्र॒तेतव॒मन॑स्त॒नूषु॒विब्भ्रत॑ः ॥ प्प्र॒जा

वन्तꣳसचेमहि ॥ ११ ॥ एषतेरुद्रभागꣳसहस्वस्राम्बिकयातजुंषस्व स्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ १२ ॥ अवरुद्रमदीमह्यवदेवन्त्यं म्बकम्॥यथानोवस्यसस्करद्यथानुꣳश्रेयसस्करद्यथानोव्यवसाय यात् ॥ १३ ॥ भेषजमसिभेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मे खायमेष्यै ॥१४॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारु कमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥१५॥ त्र्यम्बकँय्यजामहेसुग न्धिम्पतिवेदनम् ॥ उर्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥१६॥ एतत्तेरुद्रावसन्तेनपरोमूजवतोतीहि।अवततधन्वापिनाकावसुक्रात्ते

वासाऽआहिꣳसन्नः शिवोतीहि ॥ १७ ॥ त्र्यायुषञ्जमदग्नेः कश्यप
स्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥ १८ ॥ शिवोना
मासि स्वधितिस्ते पितानमस्तेऽअस्तु मामाहिꣳसीः ॥ निवर्त्तयाम्म्या
युषेन्नाद्यायप्रजननायरायस्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ १९ ॥
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च ॥ सासह्वाँश्चाभियुग्वाच विक्षिपः स्वा
हा ॥ २० ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्ग्रेणपशुपतिङ्कृत्स्नहृदयेनभ
वँय्यक्ना ॥ शर्व्वम्मतस्नाब्भ्यामीशानम्मन्न्युनामहादेवमन्तःपर्शव्ये
नोग्ग्रन्देवँव्वनिष्ठुनाव्वसिष्ठहनुः शिङ्गीनिकोश्याब्भ्याम् ॥ २१ ॥ उग्ग्रँल्लोहि

तेनमि॒त्रꣳसौव्र॑त्येनरु॒द्रन्दौर्व्र॑त्ये॒नेन्द्र॑म्प्रक्री॒डेन॑म॒रुतो॒बले॑नसा॒द्ध्या
न्प्र॒मुदा॑॥भ॒वस्य॒कण्ठ्य॑ꣳरु॒द्रस्या॑न्तःपाश्र्व्यम्म॑हादे॒वस्य॒यकृ॑च्छ॒र्व्व
स्य॑व्वनिष्ठुःप॑शु॒पतेः॑पुरी॒तत्॥२२॥ स्व॒स्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाःस्व॒स्तिनः॑
पू॒षाव्वि॒श्ववे॑दाः॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिःस्व॒स्तिनो॒बृह॒स्प्पति॑
र्द्दधातु॥२३॥पयः॑पृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑दि॒व्य॒न्तरि॑क्षे॒पयो॑धाः
॥पय॑स्वतीःप्प्र॒दिशः॑सन्तु॒मह्य॑म् ॥ २४ ॥ व्विष्णो॑र॒राट॑मसि॒व्विष्णोः॑
श्नप्त्रे॑स्थो॒व्विष्णोः॑स्यूर॑सि॒व्विष्णो॑र्द्ध्रु॒वो॒सि॒ ॥ व्वै॒ष्ण॒वम॑सि॒व्विष्णवे
त्त्वा॑॥२५॥अ॒ग्निर्द्दे॒वता॒व्वातो॑दे॒वता॒सूर्य्यो॑दे॒वता॑च॒न्द्रमा॑दे॒वता॒व्व॒सवो॑दे॒व

तांरुद्रादेवतांदित्यादेवतांमुरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्द्देवते
न्द्रोदेवताव्वरुणोदेवता॥२६॥ द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवीशा
न्तिरापः शान्तिरोषधयः शान्तिः ॥ व्वनस्पतयः शान्तिर्विश्वेदेवाः शा
न्तिर्ब्रह्मशान्तिः सर्व्वꣳशान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥
॥२७॥ इतिसꣳहितायांरुद्रपाठेषष्ठोऽध्यायः ॥ ६ ॥ छ ॥ व्वाजश्चमेप्प्रस
वश्चमेप्प्रयतिश्चमेप्प्रसितिश्चमेधीतिश्चमेक्रतुश्चमेस्वरश्चमेश्श्लोकश्च
मेश्श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेनकल्प्पन्ताम् ॥ १ ॥
प्प्राणश्चमेपानश्चमेव्व्यानश्चमेसश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्चमे

मनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्पन्ताम् ॥२॥
ओजश्चमेसहश्चमऽआत्क्मार्चमेतनूश्चमेशर्म्मचमेवर्म्मचमेङ्गानिचु
मेस्थींनिचमेपरूꣳषिचमेशरीराणिचमऽआयुश्चमेजुरार्चमेयज्ञेनक
ल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआधिपत्यञ्चमेमन्युश्चमेभामश्चमे
मश्चमेम्भश्चमेजेमार्चमेमहिमार्चमेवरिमार्चमेप्रथिमार्चमेवर्ष्मिमा
र्चमेद्राघिमार्चमे वृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सुत्त्य
श्च॥ 'नमस्ते'इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ सुत्त्य
श्चमेश्श्रुद्धार्चमेजगच्चमेधनञ्चमेविश्वञ्चमेमहश्चमेक्रीडार्चमेमोदश्च

मेजातश्चंमेजनिष्यमांणश्चमेसूक्तश्चंमेसुकृतश्चंमेयज्ञेनंकल्पन्ताम्॥
॥ ५ ॥ ऋतश्चंमेमृतंश्चमेयक्ष्मश्चुमेनांमयच्चमेजीवातुश्चमेदीर्घायु
त्वश्चंमेनामित्रश्चुमेभंयश्चमेसुषश्चंमेशयंनश्चमेसूषाश्चंमेसुदिनंश्चमेयु
ज्ञेनंकल्पन्ताम् ॥ ६॥ युन्ताचंमेधुर्त्ताचंमेक्षेमंश्चमेधृतिश्चमेविश्वंश्च
मेमहंश्चमेसम्विच्चंमेज्ञात्रंश्चमेसूश्चंमेप्रसूश्चंमेसीरंश्चमेलयंश्चमेयज्ञे
नंकल्पन्ताम्॥७॥शश्चंमेमयंश्चमेप्रियंश्चमेनुकामश्चंमेकामंश्चमेसौ
मनसश्चंमेभगंश्चमेद्रविंणश्चमेभद्रंश्चमेश्रेयंश्चमेवसीयश्चमेयशंश्चमे
यज्ञेनंकल्पन्ताम्॥८॥ऊक्चं॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नम

काध्यायःपठनीयः ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधु
चमेसग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऔद्भिद्यञ्चमे
यज्ञेनकल्पन्ताम्॥९॥रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचंमेप्र
भुचंमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञेनक
ल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसुगञ्चमे
सुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेमतिश्चमेसुमु
तिश्चमेयज्ञेनकल्पन्ताम्॥११॥व्रीहयश्चमेयवाश्चमेमाषाश्चमेतिला
श्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्चमेणवश्चमेश्यामाकाश्चमेनी

वारांश्चमेगोधूमांश्चमेमसूरांश्चमेयज्ञेनंकल्पन्ताम् ॥ १२ ॥ अश्मां च॥ 'नमस्ते' इत्यादि६६मन्त्रात्मको नमकाध्यायः पठनीयः॥ अश्मां चमेमृत्तिकाचमेगिरयंश्चमेपर्व्वताश्चमेसिकंताश्चमेवनस्पतयश्चमेहिरं ण्यञ्चमेयंश्चमेश्यामञ्चमेलोहञ्चमेसीसंञ्चमेत्रपुंचमेयज्ञेनंकल्पन्ताम् ॥ १३ ॥ अग्निश्चंमऽआपश्चमेघृतंश्चमऽओषधयश्चमेकृष्टपच्याश्चंमेकृष्टपच्याश्चंमेग्राम्याश्चंमेपशवऽआरण्याश्चंमेवित्तञ्चंमेवित्तिश्चमेभूतञ्चंमेभूतिश्चमेयज्ञेनंकल्पन्ताम् ॥ १४ ॥ वसुंचमेवसतिश्चंमेकर्म्मंचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचंमेगतिश्चमेयज्ञेनंक

ल्पन्ताम् ॥१५॥ अग्निश्चंमऽइन्द्रश्चं ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मको नमकाध्यायः पठनीयः॥ अग्निश्चंमऽइन्द्रंश्चमेसोमंश्चमऽइन्द्रंश्चमेसविताचंमऽइन्द्रंश्चमेसरस्वतीचमऽइन्द्रंश्चमेपूषाचंमऽइन्द्रंश्चमेबृहस्पतिंश्चमऽइन्द्रश्चमेयज्ञेनंकल्पन्ताम्॥१६॥मित्रश्चंमऽइन्द्रंश्चमेवरुणश्चमऽइन्द्रंश्चमेधाताचंमऽइन्द्रंश्चमेत्वष्टाचमऽइन्द्रंश्चमेमरुतश्चमऽइन्द्रश्चमेविश्वेचमेदेवाऽइन्द्रंश्चमेयज्ञेनंकल्पन्ताम्॥१७॥ पृथिवीचंमऽइन्द्रंश्चमेन्तरिक्षञ्चमऽइन्द्रंश्चमेद्यौश्चंमऽइन्द्रंश्चमेसामांश्चमऽइन्द्रंश्चमेनक्षत्राणिचमऽइन्द्रंश्चमेदिशंश्चमऽइन्द्रंश्चमेयज्ञेनंकल्पन्ता

म्॥१८॥अ॒र्ठ॒शुश्च॑॥'नमस्ते'इत्यादि६६मन्त्रात्मको नमकाध्यायः पठ
नीयः। अ॒र्ठ॒शुश्च॑मेर॒श्मिश्च॒मेदा॑ब्भ्यश्च॒मेधि॑पतिश्चमऽउपा॒ꣳशुश्च॑मेन्त
र्य्या॒मश्च॑मऽऐन्द्रवाय॒वश्च॑मेमैत्रावरु॒णश्च॑मऽआश्वि॒नश्च॑मेप्प्रतिप्र॒स्त्था
न॑श्चमेशुक्र॒श्च॑मेम॒न्थीच॑मेय॒ज्ञेन॑कल्प्पन्ताम् ॥ १९ ॥ आ॒ग्ग्र॒य॒णश्च॑मेवै
श्वदे॒वश्च॑मेध्रु॒वश्च॑मेवैश्वान॒रश्च॑मऽऐन्द्रा॒ग्नश्च॑मेम॒हावै॑श्वदेवश्चमेमरु
त्व॒तीया॑श्चमे॒निष्के॑वल्ल्यश्चमेसावि॒त्रश्च॑मेसारस्व॒तश्च॑मेपात्क्नीव॒तश्च॑
मेहारियोज॒नश्चमेय॒ज्ञेन॑कल्प्पन्ताम् ॥२०॥ स्रुच॑श्चमेचम॒साश्च॑मेवाय॒
व्या॒निचमेद्रोणकल॒शश्च॑मे॒ग्ग्रावा॑णश्चमेधि॒षव॑णेचमेपूत॒भृच्च॑मऽआध

वुनीर्यंश्चमेवेदिंश्चमेवर्हिश्चंमेवभृथश्चंमेस्वगाकारश्चंमेयज्ञेनंकल्प
न्ताम् ॥ २१ ॥ अग्निश्चंमेघर्म्मश्च ॥ 'नमस्ते' इत्यादि ६६ म
न्त्रात्मको नमकाध्यायः पठनीयः॥अग्निश्चंमेघर्म्मश्चंमेर्कश्चंमेसूर्य्य
श्चमेप्प्राणश्चंमेश्वमेधश्चंमेपृथिवीचुमेदितिश्चमेदितिंश्चमेद्यौश्चंमेऽङ्गु
लंयुःशक्करयोदिशंश्चमेयज्ञेनंकल्पन्ताम् ॥ २२ ॥ व्रतश्चमऽऋ
तवंश्चमेतपंश्चमेसम्वत्सुरश्चंमेहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तुरेचंमेयज्ञेनं
कल्पन्ताम् ॥ २३ ॥ एकांच ॥ 'नमस्ते'इत्यादि ६६ मन्त्रा
त्मको नमकाध्यायः पठनीयः ॥ एकांचमेतिस्रश्चंमेतिस्रश्चंमेपञ्चंच

मेपञ्चंचमेसुप्तचंमेसुप्तचंमेनवचमेनवंचमेऽएकादशचमेऽएकादश
चमेत्रयोंदशचमेत्रयोंदशचमेपञ्चंदशचमेपञ्चंदशचमेसुप्तदशचमेसु
प्तदंशचमेनवंदशचमेनवंदशचमेऽएकंविंऽशतिञ्चमेऽएकंविंऽशति
ञ्चमेत्रयोंविंऽशतिञ्चमेत्रयोंद्विंऽशतिञ्चमेपञ्चंविंऽशतिञ्चमेपञ्चविंऽ
शतिञ्चमेसुप्तविंऽशतिञ्चमेसुप्तविंऽशतिञ्चमेनवंविंऽशतिञ्चमेनवं
विंऽशतिञ्चमेऽएकंत्रिंऽशच्चमेऽएकंत्रिंऽशच्चमेत्रयस्त्रिंऽशच्चमेयज्ञेनं
कल्पन्ताम् ॥ २४ ॥ चतस्रश्च ॥ 'नमस्ते' इत्यादि ६६ मन्त्रात्मक नमकाध्यायः पठनीयः ॥ चतस्रश्चमेष्टौचंमेष्टौचंमेद्वादंशचमेद्वा

दंशच्मेषोडंशच्मेषोडंशच्मेविंठ्ंशतिश्च्मेविंठ्ंशतिश्च्मेचतुर्विंठ्ंश
तिश्च्मेचतुर्विंठ्ंशतिश्च्मेषोडशिविंठ्ंशतिश्च्मेषोडशिविंठ्ंशतिश्च्मेषट्त्रिंठ्ंश
च्मेषट्त्रिंठ्ंशच्मेषट्त्रिंठ्ंशच्मेषट्त्रिंठ्ंशच्मेचत्वारिंठ्ंशच्मेचत्वा
रिंठ्ंशच्मेचतुश्चत्वारिंठ्ंशच्मेचतुश्चत्वारिंठ्ंशच्मेष्टाचत्वारिंठ्ंश
च्मेयज्ञेनकल्पन्ताम् ॥ २५ ॥ त्र्यविंश्च ॥ 'नमस्ते' इत्यादि ६६म
न्त्रात्मको नमकाध्यायः पठनीयः॥त्र्यविंश्चमेत्र्युवीचंमेदित्युवाट्चंमे
दित्यौहीचंमेपश्चाविश्चंमेपश्चावीचंमेत्रिवुत्सश्चंमेत्रिवुत्साचंमेतुर्य्यु
वाट्चंमेतुर्य्यौहीचंमेयज्ञेनकल्पन्ताम् ॥ २६ ॥ पष्ठवाट्चंमेपष्ठौ

हीचंमऽउक्षाचंमेवृशाचंमऽऋषभश्चंमेवेहच्चंमेनड्वाँश्चंमेधेनुंश्चमेयज्ञेन
कल्पन्ताम् ॥ २७ ॥ वाजांयुस्वाहां ॥ अत्र "गणानान्त्वा" इत्यत
आरभ्य नमकाध्यायन्तमध्यायपञ्चकं पठनीयम्॥वाजांयुस्वाहांप्रसु
वायुस्वाहांपिजायुस्वाहाऽऋतंवेस्वाहावसंवेस्वाहांहुर्प्पतंयेस्वाहाङ्गैमु
ग्धायुस्वाहांमुग्धायंवैनर्ठशिनायुस्वाहावैनुर्ठशिनंऽआन्त्यायुनायु
स्वाहान्त्यांयभौवनायुस्वाहाभुवंनस्युपतंयेस्वाहाधिंपतयेस्वाहांप्र
जापंतयेस्वाहां ॥ इयन्तेराण्मित्रायंयुन्तासियमंनऽऊर्जेत्वावृष्ट्यैत्वा
प्रजानुन्त्वाधिंपत्याय ॥ २८ ॥ आयुर्युज्ञेनंकल्पताम्प्राणोयुज्ञेनं

कल्पतांचक्षुर्य्यज्ञेनंकल्पतांꣳश्रोत्रँय्यज्ञेनंकल्पतांम्वाग्ग्यज्ञेनंक
ल्पतांम्मनोयज्ञेनंकल्पतामात्त्कमायज्ञेनंकल्पताम्ब्रह्मायज्ञेनंक
ल्पतांज्योतिर्य्यज्ञेनंकल्पतांꣳस्वर्य्यज्ञेनंकल्पताम्पृष्ठँय्यज्ञेनंक
ल्पताँय्यज्ञोयज्ञेनंकल्पताम्॥स्तोमंश्चयजुंश्चऽऋक्चसामंचबृहच्चंर
थन्तरञ्चं ॥ स्वर्द्देवाऽअगन्नमामृताऽअभूमप्प्रजापतेःप्प्रजाऽअभूमुत्वेट्
स्वाहा॥२९॥ इतिसप्तमेहितायांरुद्रपाठेसप्त० ॥७॥ ऋचँवाचुम्प्रपद्ये
मनोयजुःप्प्रपद्येसामंप्प्राणम्प्रपद्येचक्षुःश्श्रोत्रम्प्रपद्येवागोजःसहौ
जोमयिप्प्राणापानौ ॥ १ ॥ यन्म्मेच्छिद्रञ्चक्षुषोहृदयस्यमनसोवातिं

तृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥शन्नोभवतुभुवनस्ययस्प्पतिः॥२॥भूर्भु
वः स्वः तत्सवितुर्व्वरेण्ण्यम्भर्ग्गोदेवस्यधीमहिधियोयोनः प्प्रचोदयात्
॥३॥ कयानश्चित्रऽआभुवदूतीसदावृधः सखा॥कयाशचिष्ठयावृता ।४।
कस्त्वासत्योमदानाम्मर्ठ्हिष्ठोमत्सदन्धसः॥दृढाचिदारुजेव्वसु॥५॥
अभीषुणः सखीनामविताजरितॄणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥
कयात्त्वन्नऽऊत्त्याभिप्प्रमन्दसेव्वृषन् ॥ कयास्तोतृब्भ्यऽआभर ॥७॥
इन्द्रोव्विश्श्वस्यराजति ॥ शन्नोऽअस्तुद्विपदेशञ्चतुष्प्पदे ॥ ८ ॥ शन्नो
मित्रः शव्वरुणः शन्नोभवत्त्वर्य्यमा ॥ शन्नऽइन्द्रोबृहस्पतिः शन्नोव्विष्णु

रुरुक्रुमः ॥ ९ ॥ शन्नोवातःपवताꣳशन्नस्तपतुसूर्य्यः ॥ शन्नःकनि
क्रदद्देवःपर्ज्जन्योऽअभिवर्षतु ॥१०॥अहानिशम्भवन्तुनःशर्व्वरात्रीःप्र
तिधीयताम् ॥ शन्नऽइन्द्राग्नीभवतामवोभिः शन्नऽइन्द्रावरुणारातहव्या॥शन्नऽइन्द्रापूषणावाजसातौशमिन्द्रासोमासुविषायुशꣳय्योः॥११॥
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शꣳय्योरभिस्रवन्तुनः॥ १२ ॥
स्योनापृथिविनोभवानृक्षरानिवेशनी॥यच्छानःशर्म्मसप्रथाः॥१३॥
आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन ॥ महेरणायुचक्षसे ॥ १४ ॥
योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥

तस्म्माऽअरङ्गमामवोयस्युक्षयायुजिन्वथ॥ आपोजुनयथाचनः१६॥
द्यौः शान्तिरुन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शा
न्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳशा
न्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्य
माचक्षुषासर्व्वाणिभूतानिसमीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्व्वाणिभू
तानिसमीक्षे ॥ मित्रस्यचक्षुषासमीक्षामहे॥ १८ ॥ दृतेदृꣳहमाज्यो
क्तेसुन्दृशिजीव्यासुज्योक्तेसुन्दृशिजीव्यासम् ॥ १९ ॥ नमस्तेहर
सेशोचिषेनमस्तेऽअस्त्वर्च्चिषे ॥ अन्याँस्तेऽअस्मत्तपन्तुहेतयः पावु

काऽअस्म्मब्भ्यंꣳशिवाभव ॥२०॥ नमस्तेऽअस्तुव्विद्युतेनमस्तेस्तन
यित्त्क्नवे॥नमस्तेभगवन्नस्तुयतः स्वः समीहसे ॥२१॥ यतोयतः समीह
सेततोनोऽअभयङ्कुरु ॥शन्नः कुरुप्प्रजाब्भ्योभयन्नः प्रशुब्भ्यः ॥ २२॥
सुमित्त्रियानऽआपऽओषधयः सन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुयोस्म्मा
न्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मः ॥२३॥ तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत्॥
पश्येमशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शतम्प्रब्ब्रवामश
रदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् ॥ २४ ॥
इतिसꣳहितायांरुद्रपाठेऽष्टमोऽध्यायः ॥ ८॥ ॥ ॐ नमः शिवाय ॥

॥ इति श्रीजयपुरनिवासिपंडितश्रीमाधवप्रसादकृतसुव्यवस्थाशोधना रुद्री समाप्ता ॥

॥ श्रीगणेशायनमः ॥ ॥ जटाकटाहसंभ्रमभ्रमन्निलिंपनिर्झरी-वि
लोलवीचिवल्लरीविराजमानमूर्धनि ॥ धगद्धगद्धगज्ज्वलल्ललाटपट्टपा
वके किशोरचंद्रशेखरेरतिःप्रतिक्षणंमम ॥ १ ॥ धराधरेंद्रनंदिनीवि
लासबंधुबंधुर-स्फुरद्दृगंतसंततिप्रमोदमानमानसे ॥ कृपाकटाक्षधो
रणीनिरुद्धदुर्धरापदि क्वचिच्चिदंबरेमनोविनोदमेतुवस्तुनि ॥ २ ॥ ज
टाभुजंगपिंगलस्फुरत्फणामणिप्रभा-कदंबकुंकुमद्रवप्रलिप्तदिग्वधूमु
खे ॥ मदांधसिंधुरस्फुरत्त्वगुत्तरीयमेदुरे मनोविनोदमद्भुतंबिभर्तुभूत
भर्तरि ॥ ३ ॥ सहस्रलोचनप्रभृत्यशेषलेखशेखर-प्रसूनधूलिधोरणीवि

धूसरांघ्रिपीठभूः ॥ भुजंगराजमालयानिबद्धजाटजुटकः श्रियेचिराय
जायँतांचकोरबंधुशेखरः ॥ ४ ॥ ललाटचत्वरज्वलद्धनंजयस्फुलिंग
भा-निपीतपंचसायकंनमन्त्रिलिंगनायकम् ॥ सुधामयूखलेखयाविरा
जमानशेखरं महःकपालिसंपदेशिरोजटालमस्तुनः ॥ ५ ॥ करालभाल
पट्टिकाधगद्धगद्धगज्ज्वल-द्धनंजयाधरीकृतप्रचंडपंचसायके ॥ धराध
रेंद्रनंदिनीकुचाग्रचित्रपत्रक-प्रकल्पनैकशिल्पिनित्रिलोचनेमतिर्मम
॥ ६ ॥ नवीनमेघमंडलीनिरुद्धदुर्धरस्फुरत्-कुहूनिशीथिनीतमःप्रबंध
बंधुकंधरः ॥ निलिम्पनिर्झरीधरस्तनोतुकृत्तिसिंधुरः कलानिधानबं

धुरःश्रियंजगद्धुरंधरः ॥ ७ ॥ प्रफुल्लनीलपंकजप्रपंचकालिमच्छटा-वि
डंबिकंठकंधरारुचिप्रबंधकंधरम् ॥ स्मरच्छिदंपुरच्छिदंभवच्छिदंम
खच्छिदं गजच्छिदांधकच्छिदंतमंतकच्छिदंभजे ॥ ८ ॥ अगर्वसर्व
मंगलाकलाकदम्बमंजरी-रसप्रवाहमाधुरीविजृंभणामधुव्रतम् ॥ स्म
रांतकंपुरांतकंभवांतकंमखांतकं गजांतकांधकांतकंतमंतकांतकंभजे
॥ ९ ॥ जयत्वदभ्रविभ्रमभ्रमद्भुजंगमस्फुरद्-धगद्धगद्धिनिर्गमत्कराल
भालहव्यवाट् ॥ धिमिद्धिमिद्धिमिद्ध्वनन्मृदंगतुंगमंगल-ध्वनिक्रमप्रव
र्तितप्रचण्डताण्डवःशिवः ॥ १० ॥ दृषद्विचित्रतल्पयोर्भुजंगमौक्ति

कस्त्रजोर्वरिष्ठरत्नलोष्ठयोःसुहृद्विपक्षपक्षयोः ॥ तृणारविंदचक्षुषोःप्र
जामहीमहेन्द्रयोः समंप्रवर्तयन्मनःकदासदाशिवंभजे ॥ ११ ॥ कदा
निलिंपनिर्झरीनिकुंजकोटरेवसन् विमुक्तदुर्मतिःसदाशिरःस्थमंज
लिंवहन् ॥ विमुक्तलोललोचनोललामभाललग्नकः शिवेतिमंत्रमुच्चर
न्कदासुखीभवाम्यहम् ॥ १२ ॥ इदंहिनित्यमेवमुक्तमुत्तमोत्तमंस्त
वं पठन्स्मरन्ब्रुवन्नरोविशुद्धिमेतिसंततम् ॥ हरेगुरौसुभक्तिमाशुया
तिनाऽन्यथागतिं विमोहनंहिदेहिनांसुशंकरस्यचिंतनम् ॥ १३ ॥
पूजाऽवसानसमयेदशवक्त्रगीतं यःशंभुपूजनमिदंपठतिप्रदोषे ॥ त

स्यास्थिरांरथगजेंद्रतुरंगयुक्तां लक्ष्मींसदैवसुमुखींप्रददातिशंभुः१४॥ तां.
इति श्रीरावणविरचितं शिवतांडवस्तोत्रं संपूर्णम् ॥ ॥ ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाःशरीरं गृहं पूजा ते विषयो
पभोगरचना निद्रा समाधिस्थितिः॥ संचारः पदयोः प्रदक्षिणविधिः
स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलंशंभोतवाराधनम्१

इदं पुस्तकं मुम्बय्यां खेमराजश्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेङ्कटेश्वर" (स्टीम्) यन्त्रालये
मुद्रयित्वा प्रकाशितम् ।
संवत् २०३४ शके १८९१

मुद्रक और प्रकाशक—

खेमराज श्रीकृष्णदास,

अध्यक्ष—'श्रीवेंकटेश्वर' प्रेस ७ वीं खेतवाडी, बम्बई ४ के लिये दे० स० शर्मा मैनेजर द्वारा मुद्रित।

पुनर्मुद्रणादि सर्वाधिकार "श्रीवेंकटेश्वर" मुद्रणयन्त्रालयाध्यक्षाधीन है।

इति

शुक्लयजुर्वेदीयषडङ्गरुद्राष्टाध्यायी

समाप्ता ।